IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# संस्कृतवाङ्मये अश्वमेधयागस्य वैशिष्ट्यम्

**DSV Jagannatha Sharma**
Assistant Professor
Kalpa Department
S.V. Vedic University
Tirupati

**प्रस्तावना**

इज्यन्ते देवता अत्र इति यजपूजादौ नङ् प्रत्यये यज्ञः सिध्यति। यज्ञ एव समस्तकर्मसु श्रेष्ठकर्मरूपेण ब्राह्मणग्रन्थेषु व्यवहृतः। विश्वस्य सर्वश्रेष्ठतमो देवः प्रजापतिः यज्ञस्वरूपः एव। यज्ञः नित्य – नैमित्तिक – काम्य – आध्यात्म – आधिदैविक – आधिभूतभेदैः षड्विधः प्रोक्तः। पुनः उपासनायज्ञः निर्गुणोपासना – सुगुणोपासना – अवतारोपासना – ऋषिपितृदेवतोपासना – भूतप्रेतासुराद्युपासना – मन्त्रयोग – हठयोग – लययोग – राजयोग इति नवधा विभक्तः। श्रवण – मनन – निधिध्यासनादिभेदेन ज्ञानयज्ञस्त्रिप्रकारकः भवति।

**यज्ञस्य वैशिष्ट्यम्**

प्रजापतिः यज्ञमुखेन विश्वमिदं सृजति।

**सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः।**
**अनेन प्रसविष्यध्वमेषवोऽस्त्विष्ट कामधुक्।।**[1]

इति श्रौतस्मार्तवचनात् यज्ञैरेव जगतः सृष्टिः। विश्वमिदं सृष्ट्वा तस्मिंश्च प्रविश्य सर्वं सञ्जीवयति। अत एवोक्तम् – तत् सृष्ट्वा तदेवानुप्राविशत् यथा सृष्टेः विविधाः प्रक्रियाः भवन्ति तथैव यज्ञा अपि प्रक्रियाभेदादनेकविधस्वरूपसम्पन्नाः अस्माकं पुरतः समायान्ति। ताः यथा अग्न्याधानाग्निहोत्रदर्शपूर्णमासचातुर्मास्यनिरूढ पशुबन्धपोचयनसोपेत्रा-मण्याश्वमेधपुरुषमेधसर्वमेधगवामचनवाजमसौयराजसूयादयः। तत्र दर्शपूर्णमासाभ्यां जगतः सृष्टिः, अग्निहोत्रेण चोत्पन्नानां सत्वानामधारणं संरक्षणञ्च, चातुर्मास्येन अन्नौषधिवनस्पतीनां सृष्टिः, निरूढपशूबन्धेन जीवानाम्, सोमेन च देवानाम्, सौत्रामण्या मनुष्याणां सृष्टिः, अश्वमेधेन महापातकनाशनम्, प्रारब्धस्य च क्षयः, चयनेन मुक्तिः, पुरुषमेधेन आत्मज्ञानं, सर्वमेधेन च शरीरस्थं असुरतत्त्वं विहाय सन्यासाय प्रव्रजन्ति प्रमातारः। एवमुपर्युक्तेभ्यः विविधेभ्यः यज्ञेभ्यः अनेकविधिक्रियाः सम्पद्यन्ते। न केवलं मनुष्येभ्यः एवापितु समस्तचराचरात्मकेभ्यो जीवेभ्यो उपर्युक्ताः यज्ञाः सन्त्यावश्यकाः। यतः इमे सर्वेऽपि यज्ञाः नित्या अपि सन्ति काम्या अपि च सन्ति। काम्यानुष्ठानानां फलानि तु पृथक् पृथक् अपि भवन्ति परन्तु उपर्युक्तानि फलानि तु नित्यानामेव उक्तानि। नित्ययज्ञास्तु सर्वैस्त्रैवर्णिकैः अप्यनुष्ठेयाः एव भवन्ति। अकरणे प्रत्यवायो भवति। यथा अशनपानादिक्रियाः समस्तेभ्यः चराचरेभ्यः सुनिश्चिताः तथैव नित्ययज्ञानामनुष्ठानान्यपि सर्वैरावश्यकान्येव। तस्मादेव इमे यज्ञाः नित्यं नैरन्तर्येण सर्वदा सर्वत्र प्रचलन्तो दृश्यन्ते। यथा अग्नि – वायु – सूर्यादिषु देवतासु ये यज्ञाः प्रचलन्ति ताः आधिदैविकाः, भौतिकपदार्थेषु ये यज्ञाः प्रचलन्ति ताः

1. शुक्लयजुर्वेदः – 3/76

आधिदैविकाः तथा च जीवेषु भूयमानाः यज्ञाः आध्यात्मिकाः इत्युच्यन्ते। अतोऽनेन विवचनेन यज्ञास्तु त्रिविधाः – आधिदैविकाधिभौतिकाध्यात्मिकाश्च। वस्तुतस्तु यज्ञशब्दस्य लक्षणं कुर्वता महर्षिकात्यायनेन लिखितं "द्रव्यं देवता त्यागः" इति। अर्थात् देवानुद्दिश्य द्रव्याणां त्यागो यत्र भवति तत्र यज्ञः सम्पद्यते। इत्थं यज्ञः देवतास्वरूपमग्निं प्रज्वाल्य तस्मिन्नग्नौ घृतादि द्रव्याणामाहुतिः दीयते। अस्याः आदानविसर्गात्मिकायाः क्रियायाः नाम यज्ञ एव। देवता द्रव्यं गृह्णाति एवञ्च यजमानः द्रव्यं त्यजति। अस्माकं शरीरे वैश्वानरोऽग्निः देवताऽस्ति। गीतायामुक्तं यथा –

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः।**
**प्राणापानसमायुक्तः पञ्चाम्यन्नं चतुर्विधम्।।**[1]

**अश्वमेधयागः**

भारतदेशस्य प्राचीनप्रख्यातयज्ञो भवति अश्वमेधः। वैदिकयज्ञेषु अश्वमेधयागः अत्यन्तमहत्त्वपूर्णो भवति। ऋग्वेदे अस्य यागस्य विषये मन्त्रद्वयं दृश्यते। शतपथब्राह्मणे, तैत्तिरीयब्राह्मणे, कात्यायनीय श्रौतसूत्रेषु, आपस्तम्बसूत्रेषु, आश्वलायनसूत्रेषु, शंखयन ग्रन्थेष्वपि अस्य प्रस्तावना सन्दृश्यते। महाभारतेऽपि महाराजः युधिष्ठिरः कौरवाणामुपरि विजयं प्राप्य तत् पश्चात् पापमोचनार्थम् अश्वमेधयागं कृतवानिति प्राप्यते।

सार्वभौमः राजा अर्थात् चक्रवर्ती नरेश एव अश्वमेधयागकरणे समर्थो भवति। परन्तु ऐतरेयब्राह्मणमनुसृत्य अन्यराजानामपि अस्य यागस्य करणे अधिकारमस्तीति ज्ञायते। आश्वलायनसूत्रानुसारेण यो राजा सर्ववस्तुसङ्ग्रहणे उत्सुकस्तथा समस्तसमृद्धिप्राप्तुं काङ्क्षमाणः स एव अश्वमेधयागकरणे समर्थो भवेत्।

**अश्वमेधयागकरणे मुख्योद्देशः**

1. अश्वमेधयागः एकः आध्यात्मिकप्रयोगः। अयं च भारतीयसंस्कृतेः दिव्यज्ञानाय संस्कृतिवर्धनाय च प्रवर्तते।
2. अश्वमेधयागः सङ्कटपरिस्थितं सन्तुलनं करोति तथा आध्यात्मिकवातावरणा-विष्करणाय गायन्त्रीमन्त्रेण संयोजितो भवति।
3. अश्वः समाजे प्रभूतदोषप्रतीकः तथा मेधः सर्वदोषोन्मूलकसंकेतश्च।
4. राष्ट्रैक्यताजागरणाय, जनानां बौद्धिकप्रतिभाऽऽनयनाय योगोऽयमुपकरोति।
5. दोषनिर्मूलनं, गुणवृद्धिञ्च करोत्ययं यागः।
6. अश्वमेधयागः यत्र क्रियते तत्र अपराधीनां भावः न्यूनो भवति।

**यज्ञस्य प्रारम्भसमयः**

अश्वमेधयागस्य आरम्भः फाल्गुनशुक्लपक्षे अष्टमी वा नवमी वा ज्येष्ठमासस्य शुक्लाष्टम्यां वा प्रारभ्यते। आपस्तम्बस्तु चैत्रपूर्णिमा एव यागस्यास्य समुचिततिथिरूपेण निर्णीतः। प्रथमं मूर्धाभिषिक्तः राजा यजमानरूपेण मण्टपे प्रविष्टानन्तरमेव तस्य चतस्रः पत्न्यः सुसज्जिताः कण्ठमालाधारिणः च दासीपुत्रसमेताः तत्र मण्टपे प्रविशन्ति। ताः महिषी, वावाता, परिवृक्त्री, पालागली च। अश्वमेधयागाय परिपुष्टः, सुन्दरः अश्वः चयनीयः। तस्य शरीरे श्यामवर्णस्य चिह्नं स्यात्। प्रथमं तडागे तमश्वं स्नानं कारयित्वा विधिवत् पवित्रकर्मणे अभिषेकं करणीयम्। तत्पश्चात् सः अश्वः शतराजकुमाराणां संरक्षणे एकवर्षं यावत् स्वच्छन्दरूपेण विसर्जन्ति। अश्वस्य अनुपस्थितिकारणात् प्रतिदिनं इष्टिकात्रयं सवितृदेवाय दीयते तथैव ब्राह्मणक्षत्रियजनैः विरचित पद्यानि राजसन्निधौ स्तुतिपूर्वकं प्रतिदिनं गीयन्ते। प्रतिदिनं विशिष्टाख्यानस्य पारायणं क्रियते। एकवर्षं यावत् निर्विघ्नतया बहिः सञ्चारशीलोऽश्वः यदा राज्यं पुनरागमिष्यति तदा

1. भगवद्गीता – 5/4

राजा दीक्षाग्रहणं करोति। अश्वमेधः सुत्यात्रयदिनपर्यन्तं क्रियमाणो यज्ञः भवति। सुत्यादिवसो नाम "सुत्याऽभिषवः सवनं च सा" इत्यमरः। सवनस्य दिवसो इत्यर्थः। सोमलतां चूर्णीकृत्य आनीयमान सोमरसः। यज्ञेऽस्मिन् द्वादश दीक्षाः, द्वादश उपसदः, सुत्यात्रयं च भवन्ति। एकविंशत्यरत्नोन्नतिः, एकविंशत्यूपश्च निर्णीतः। द्वितीयसुत्यादिनं प्रधानं तथा विशेषमहत्वशालीदिनं भवति। तस्मिन् दिने अश्वमेधीयं यज्ञम् अन्याश्वत्रयैः सह रथे संयोज्य तडागे स्नानं कारयन्ति। तदा राजा व्याघ्रचर्मे वा सिंहचर्मस्योपरि वा उपविशति। तृतीयदिने उपाङ्गयागः सम्पद्यते। तदा ऋत्विजानां कृते भूरिदक्षिणा प्रदीयते। होता – ब्रह्मा - अध्वर्यु – उद्गाता एतेषां कृते पूर्व – दक्षिण – पश्चिम – उत्तरदिशासु आनीतं धनसम्पत्तिं दक्षिणारूपेण प्रदीयते। अनेन दानेन अश्वमेधयागः सम्पन्नो भवति।

ऐतिहासिककाले वैदिकधर्मानुयायिनः राजानः अनेके अश्वमेधयागं कृतवन्तः। तेषु दशरथः तथा युधिष्ठिरश्च प्रसिद्धौ च। द्वितीयशताब्दौ ब्राह्मणनरेशः पुष्यमित्रः द्विवारं अश्वमेधयागं समाचरितवान्। तत्र पतञ्जलिमहर्षिः स्वयं विराजमानश्चासीत्। गुप्तसम्राट् समुद्रगुप्तोऽपि अश्वमेधयागं कृतवानिति तस्य अश्वमेधीयमुद्राभिः विज्ञायते। दक्षिणभारते शातवाहन - चालुक्य – यादवनरेशाः अपि अश्वमेधं कृतवन्तः। जयपूरमहाराजः सवाई जयसिंहोऽपि अश्वमेधयागं कृतवानिति श्रीकृष्णभट्टकविकलानिधिना विरचिते "ईश्वरविलासमहाकाव्ये" लिखितमस्ति।

श्रीरामोऽपि रावणं हत्वा अयोध्यां प्रस्थितवान्। रावणः पुलस्त्यमहर्षेः पुत्रः, माता राक्षसी च। पितुः कारणात् रावणो ब्राह्मण एव। अतः ब्राह्मणहत्यादोषः निवारणीयः इति विचिन्त्य राजगुरुः वशिष्ठमहर्षिः तत्पापपरिहाराय अश्वमेध यागः करणीय इत्यादिदेश। अतः पापविमुक्तये श्रीरामः अश्वमेधयागं कृतवानिति तथैव सम्पूर्णभारतं एकत्रीकरणाय भविष्ये आगमन युद्धनिवारणाय च श्रीरामः अश्वमेधयागं कृतवानिति ज्ञायते।

महाभारतयुद्धानन्तरं पितामहः भीष्मः दिवंगते सति युधिष्ठिर शोकाकुलो जातः। तदा व्यासमहर्षिः तत्रागतः। तदा युधिष्ठिरः एवमपच्छत् –

**यदृच्छया च सम्प्राप्तं व्यासं पप्रच्छ सादरम्।**
**केनोपायेन मे ब्रह्मन् गोत्रहत्याकृतं भयम्।।**[1]

पूर्वजैः द्वारा उपार्जितं राज्यं मह्यं न रोचतेति चिन्तयामास युधिष्ठिरः। तदा व्यासः युधिष्ठिरमुद्दिश्य एवमुपदिदेश – "हे राजेन्द्र! नात्र तव दोषः, भयं मा वहतु। उपायमेकं कथयिष्यामि तेन त्वं पवित्रतामधिगमिष्यतीति सान्त्वनवचनैः कथयामास।

**यथा गोत्रकृतां हिंसामपहास्यसि पाण्डव।**
**अश्वमेधं क्रतुवरं यजस्व कुरुनन्दन।।**[2]

भगवतः श्रीकृष्णस्य आज्ञानुसारेण प्राप्तं राज्यं परिपालनीयमेव। मरुत्तेन सम्पादितधनेन यज्ञं कुर्विति प्रोत्साहयामास। अश्वमेधयागकरणावसरे कियन्तः ब्राह्मणाः अपेक्षतेति प्रश्नस्य व्यासः वदति यत् उत्तमकुलोत्पन्नाः सहस्रसंख्याकाः ब्राह्मणाः माननीयाः वेदशास्त्रपारङ्गताः अपेक्षिताः। कीयत् दक्षिणा दातव्या इति पृष्ट्वा धर्मनन्दनः सर्वश्रेयस्करम् अश्वमेधयागं कृत्वा सफलो जातः। अधुना के राजवंशीयाः अश्वमेधयागं कृतवन्त इति पश्यामः –

1. रघुवंशस्य महाराजः दशरथः अश्वमेधयागं कृतवानिति रामायणात् विज्ञायते –

---

1. जैमिनीभारतम् – श्लो - 4
2. जैमिनीभारतम् – श्लो. 13

1. **ऋष्यश्रृङ्गं पुरस्कारं कर्मचक्रृद्विजर्षभाः।**
2. **अश्वमेधे महायज्ञे राज्ञो यस्य सुमहात्मनः।।**[1]

2. रामचन्द्रोऽपि कृतवानित्यत्र सूचना यथा –
   i. **अश्वमेधशतैरिष्ट्वा तथा बहुसुवर्णकैः।**
   ii. **गवान् कौट्युतं दत्वा विद्वद्भ्यो विधिपूर्वकं असंख्येयं धनं दत्वा हायशी।।**[2]
3. कश्यपराजवंशोद्भवः महाराजः पृथुरपि अश्वमेधयागं कृतवान् –
   i. **चरमेणाश्वमेधेन यजमाने यजुष्पतिम्।**
   ii. **वैन्ये यज्ञपशुं स्पर्थन्नपोवाः तिरोहितः।।**[3]
4. कश्यपराजवंशोद्भवः राजा पुरधरोऽपि अश्वमेधयागं कृतवान् –
   i. **हृत्या बलिसमः कृष्णे प्रह्लद इव सद्ग्रहः।**
   ii. **आहार्यशोयश्वमेधानां वृद्धानां पर्युपासकः।।**[4]
5. यदुवंशोद्भवः धर्मपुत्रोऽपि अश्वमेधयागमकारि।
   i. **तेषां तु षट्प्रधानानां पृथुश्रवस् आत्मजः।**
   ii. **धर्मो नामोषण तस्य ह्यमेधशतस्य यत्।।**[5]
6. कुरुवंशोद्भवः जनमेजयोऽपि अश्वमेधयागं कृतवान् –
   i. **कालषेयं पुरोधाय तुरं तुरगमेधषट्।**
   ii. **समन्तात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः।।**[6]

इतोऽपि परीक्षिन्महाराजः, युधिष्ठिरः, सगरमहाराजः, अम्बरीषः, सोमदत्तः इत्याद्यनेके राजानः अश्वमेधयागं कृत्वा समस्तभूमण्डलं परिपालयामासुः।

**उपसंहारः**

सर्वपापान्विमुक्तयै तथा समस्तभूमण्डलपरिपालनाय च अश्वमेधयागः सुप्रसिद्ध आसीत्।

**आधारग्रन्थसूची**


1. श्रीमद्रामायणम् – वाल्मीकिः – एम्. एल्. जे. प्रेस्. प्रैवेट् लिमिटेड्, मद्रास्।
2. महाभारतम् – वेदव्यासः – चित्रशालाप्रेस् – पूना।
3. भागवतम् – व्यासमहर्षिः – गीताप्रेस्, गोरखपूर्।
4. जैमिनी अश्वमेध – कथासार – जैमिनीमहर्षिः – बालकृष्णलक्ष्मणपाठक् बुक् सेलर, मुम्बई।
5. शुक्लयजुर्वेदः – मनोहर विलालंकारः – चौवडीबाजार् – दिल्ली।


1. श्रीमद्रामायणं – 1-13
2. श्रीमद्रामायणम् – 1.1.94
3. श्रीमद्भागवतम् -4.19
4. श्रीमद्भागवतम् – 1.12
5. श्रीमद्भागवतम् – 1.23.33
6. श्रीमद्भागवतम् -1.22